सुख्यमेवानुशयिनां श्वादिजन्म सुखदुःखान्वितम्भवति एवं व्रीह्यादिजन्मापीत्येवं प्राप्ते ब्रूमः। अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यन्ते न तत्सुखदुःखभाजो भवन्ति पूर्ववत्। यथा वायुधूमादिभावोऽनुशयिनान्तत्संश्लेषमात्रमेवं व्रीह्यादिभावोऽपि स्थावरैः संश्लेषमात्रम्। कुत एतत्? तद्वदेवेहाप्यभिलापात् कोऽभिलापस्य तद्भावः! कर्मव्यापारमन्तरेण संकीर्त्तनं यथाऽऽकाशादिषु न कञ्चित् कर्मव्यापारं परामृशति एवं व्रीह्यादिजन्मन्यपि। तस्मान्नास्त्यत्र सुखभाक्त्वमनुशयिनाम् यत्र तु सुखदुःखभाक्त्वमभिप्रैति, परामृशति तत्र कर्मव्यापारं "रमणीय चरणाः कपूयचरणा" इति च। अपि च मुख्येऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु भज्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभिमानिनोऽनुशयिनः प्रवसेयुः यो हि जीवो यच्छरीरमभिमन्यते स तस्मिन् पीड्यमाने प्रवसतीति प्रसिद्धम्। तत्र व्रीह्यादिभावाद्रेतःसिग्भावोऽनुशयिनां नाभिलप्येत, अतः संसर्गमात्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति। एतेन जनेर्मुख्यार्थत्वं प्रतिब्रूयात् उपभोगस्थानत्वञ्च स्थावरभावस्य। न च वयमुपभोगस्थानत्वं स्थावरभावस्यावजानीमहे। भवत्वन्येषां जन्तूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानामेतदुपभोगस्थानं, चन्द्रमसं त्ववरोहन्तोऽनुशयिनो न स्थावरभावमुपभुञ्जत इत्याचक्ष्महे" भा०। "अशुद्धमिति चेन्न शब्दात्" सू०। "यत् पुनरुक्तं पशुहिंसादियोगादशुद्धमाध्वरिकं कर्म तस्यानिष्टमपि फलमवकल्प्यत इत्यतो मुख्यमेवानुशयिनो व्रीह्यादिजन्मास्तु तत्र गौणी कल्पनाऽनर्थिकेति तत् परिह्रियते। न शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य अयं धर्मः अयमधर्म इति शास्त्रमेव विज्ञाने कारणम् अतीन्द्रियत्वात्तयोरनियतदेशकालनिमित्तत्वाच्च। यस्मिन्देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेषु अधर्मो भवति तेन न शास्त्रादृते धर्माधर्मविषयं ज्ञानं कस्यचिदस्ति। शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितं स कथमशुद्ध इति शक्यते वक्तुम्। ननु "मा हिंस्यात् सर्व्वा भूतानीति" शास्त्रमेव भूतविषयां हिंसामधर्म इत्यवगमयति"। वाढं उत्सर्गस्तु सः। अपवादः "अग्नीषोमीयं पशुमालभेतेति" उत्सर्गापवादयोश्च व्यवस्थितविषयत्वम् तस्माद्विशुद्धं वैदिकं कर्म शिष्टैरनुष्ठीयमानत्वादनिन्द्यमानत्वाच्च। तेन न तस्य प्रतिरूपं फलं जातिस्थावरत्वम्। नच श्वादिजन्मवदपि व्रीह्यादिजन्म भवितुमर्हति तद्धि कपूयचरणानधिकृत्योच्यते नैवमिह वैशेषिकः कश्चिदधिकारोऽस्ति। अतश्चन्द्रस्खलात् स्खलितानामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्य्यते" भा०। "रेतःसिग्योगोऽथ" सू०। "इतश्च व्रीह्यादि संश्लेषमात्रं तद्भावः यत्कारणं व्रीह्यादिभावस्यानन्तरमनुशयिनां रेतःसिग्भाव आम्नायते। "योयोह्यन्नमत्ति योरेतः सिञ्चति तद्भूय एव भवतीति"। न चात्र मुख्योरेतःसिग्भावः सम्भवति चिरजातो हि प्राप्तयौवनो रेतःसिग्भवतीति कथमिवानुपचरिततद्भावमद्यमानान्नानुगतोऽनुशयी प्रतिपद्येत तत्रावश्यं रेतःसिग्योग एव रेतःसिग्भावोऽभ्युपगन्तव्यः। तद्वद्व्रीह्यादिभावोऽपि व्रीह्यादियोग एवेत्यविरोधः" भा०॥ "योनेःशरीरम्" सू०॥ "अथ रेतःसिग्भावस्यानन्तरं योनौ सिक्ते रेतसि योनेरधिशरीरमनुशयिनामनुशयफलोपभोगायतनम् इत्याह शास्त्रम् "तद्य इह रमणीयचरणा" इत्यादि। तस्मादप्यवगम्यते नावरोहे व्रीह्यादिभावावसरे तच्छरीरमेव सुखदुःखान्वितं भवतीति। तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धम्" भा०। संज्ञायां कर्त्तरि घञ् "वटादितरोः शाखातो मूलावधि अवतारकेऽंशभेदे च। "अवरोहगताकीर्णं वटमासाद्य तस्थतुः" रामा०। ज्योतिषोक्ते दशाभेदे स्त्री अवरोहिशब्दे उदा०।

**अवरोहण** न० अव+रुह भावे ल्युट्। अवतरणे (नामा) "एवमारोहणावरोहणमतः"। कात्या० १८।३।६।

**अवरोहशाखिन्** पु० अवरोहति छिन्नोऽपि पुनः प्ररोहति अव+रुह–अच् कर्म्म०, अवरोहति अधोगच्छति मूलमस्याः तादृशी शाखा कर्म्म० ततः बाहुल्ये मत्वर्थीय इनिर्वा। वटवृक्षे, तस्य छेदनेऽपि पुनः प्ररोहः तस्य च शाखातोऽपि बहूनि मूलान्यवतरन्तीति तस्य तथात्वम्। व०। अवरोहिशाखोऽप्यत्र।

**अवरोहिका** स्त्री अवरोहति अत्यन्तमधोगच्छति अव+रुह–ण्वुल् टाप् कापि अतइत्त्वम्। अश्वगन्धालतायाम्।

**अवरोहित** पु० अवरोहितो वर्णः। अल्परक्तवर्णे मध्वादि० अचोबाधकः मतुप्। अवरोहितवान् अल्परक्तवर्णयुक्ते त्रि० स्त्रियां ङीप्।

**अवरोहिन्** त्रि० अव+रुह–णिनि। १वटवृक्षे। २अवतरणकर्त्तृमात्रे त्रि० स्त्रियां ङीप्। सा च ज्योतिषोक्ते ३दशाभेदे तथा हि दशाशब्दे वक्ष्यमाणस्य "आच्छंकुराजीशबुकेशुपूर्वा"